# शिक्षाशास्त्रि (बी.एड्.)

# प्रवेशपरीक्षा - 2021 निर्देशिका

## राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**(संसदःअधिनियमेन स्थापितः केन्द्रियविश्वविद्यालयः)**

**तिरुपतिः – ५१७ ५०७ आन्ध्रप्रदेशः**

**जालस्थानम् Website : http://nsktu.ac.in**

**Email- nsucet@gmail.com**

# विषयानुक्रमणिका


| क्र.सं. | विषयः | पृ. सं |
|---|---|---|
| 1. | राष्ट्रियसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः | 2 |
| 2. | शिक्षाविभागः | 2 |
| 3. | शिक्षाशास्त्रिपाठ्यक्रमस्य संक्षिप्तपरिचयः | 2 |
| 4. | शिक्षाशास्त्रिप्रवेशार्थं न्यूनतमयोग्यता | 2 |
| 5. | शिक्षाशास्त्रिपाठ्यक्रमशुल्कः | 3 |
| 6. | शिक्षाशास्त्रि - अध्ययनकेन्द्रं स्थानानि च | 3 |
| 7. | आरक्षितस्थानानि | 4 |
| 8. | आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः | 4 |
| 9. | शिक्षाशास्त्रि प्रवेशपरीक्षा-प्रमुखदिनाङ्काः | 5 |
| 10. | प्रवेशपरीक्षा - 2021 दिनाङ्कः समयश्च | 6 |
| 11. | अधितन्त्रिमाध्यमेन-आवेदनार्थं निर्देशाः | 6 |
| 12. | परीक्षाकेन्द्राणि | 7 |
| 13. | प्रवेशपरीक्षापद्धतिः | 7 |
| 14. | प्रवेशपरीक्षार्थं निर्दिष्टावधिः | 7 |
| 15. | प्रवेशपरीक्षासम्बद्धाः अवधेयाः सूचनाः | 8 |
| 16. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः प्रश्नपत्ररूपरेखा | 8 |
| 17. | मूल्याङ्कनविधिःउत्तीर्णतायै प्रतिशताङ्काश्च | 8 |
| 18. | फलितांशाः | 9 |
| 19. | शिक्षाशास्त्रिप्रवेशपरीक्षा - 2021 पाठ्यक्रमः | 9 |
| 20. | आदर्शप्रश्नाः | 11 |

# शिक्षाशास्त्रि (B.Ed)-प्रवेशपरीक्षा - 2021

## 1. राष्ट्रियसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः

आन्ध्रप्रदेशेषु विद्यमाने तिरुपतिः इत्याख्ये विश्वप्रसिद्धक्षेत्रे स्थितं केन्द्रियसंस्कृतविद्यापीठं भारतसर्वकारेण घटितस्य संस्कृतायोगस्य अनुशंसनानुसारं 1961 तमे वर्षे पारम्परिकसंस्कृतसाहित्यस्य आधुनिकशोधशैल्या प्रचारप्रसारार्थं संस्थापितम् । अप्रैल 1971 तमे वर्षे राष्ट्रियसंस्कृतसंस्थानस्य संरक्षणे एषा संस्था शिक्षामन्त्रालयस्य स्वायत्तसंस्थारूपेण प्रतिष्ठापिता । 1987 तमे वर्षे विश्वविद्यालयानुदानायोगस्य (UGC) अधिनियमानुसारम् (1956) एतत् विद्यापीठं मानितविाश्वविद्यालयत्वेन घोषितम् । अत्र प्राक्-शास्त्रितः शास्त्री, आचार्य, विद्यावारिधिपर्यन्तं शास्त्राणामध्ययनार्थं छात्रावाससहिता व्यवस्था परिकल्पिता वर्तते । शिक्षाशास्त्री, शिक्षाचार्यः, विद्यावारिधिः(शिक्षा) इत्यादीनां व्यावसायिकशिक्षाणां प्रशिक्षणम् आधुनिकशैल्या प्रदीयते ।

विद्यापीठमिदं भारतसर्वकारस्य संसदः अधिनियमेन 2020 तमात् वर्षात् राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन प्रोन्नतम् । अस्य विश्वविद्यालयस्य पाठ्यक्रमाः सर्वेऽपि UGC, NCTE इत्याभ्यां संस्थाभ्यां द्वारा नियमानुसारं विधिवत् प्राप्तमान्यताः सन्ति । 2015 तमे वर्षे अयं विश्वविद्यालयः NAAC द्वारा “ए” श्रेण्या (द्वितीयचक्रे) मूल्याङ्कनेन मान्यता प्राप्तासीत् ।

## 2. शिक्षाविभागः

1962 तमे वर्षे शिक्षाविभागः स्थापितः । विभागेऽस्मिन् त्रयः पाठ्यक्रमाः विद्यन्ते - 1. शिक्षाशास्त्रि (B.Ed,) 2. शिक्षाचार्य (M.Ed), 3.विद्यावारिधिः( Ph.D) शिक्षाशास्त्रिपाठ्यक्रमे विभागेन संस्कृतम् – हिन्दी – तेलुगु – आङ्ग्लम् इति शिक्षणपद्धतीनां प्रशिक्षणार्थम् अवसरः प्रकल्पितः। तत्र प्रथमशिक्षणपद्धतिरूपेण संस्कृतशिक्षणं शिक्षाशास्त्रिपाठ्यक्रमे प्रविष्टेभ्यः सर्वेभ्यः छात्रेभ्यः अनिवार्यम् । एवमेव द्वितीयशिक्षणपद्धतिः स्वीकरणे छात्रेभ्यः स्वातन्त्र्यं प्रदीयते ते स्वयं आधुनिकशिक्षणपद्धतीषु हिन्दी – तेलुगु – आङ्गलम् इत्यादिषु कस्याप्येकस्य चयनं कर्तुं शक्नुवन्ति ।

## 3. शिक्षाशास्त्रिपाठ्यक्रमस्य संक्षिप्तपरिचयः

राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रिपाठ्यक्रमः राष्ट्रियाध्यापकशिक्षापरिषदा (NCTE) मान्यता प्राप्ता F.No.SRO/NCTE/APS09601/B.Ed/AP/2015/65123) Dated 19.05.2015. राष्ट्रियाध्यापकशिक्षापरिषदा – (NCTE) समूहद्वये (Each unit - 50 intake) अनुमोदितस्थानानि सन्ति । 2015 -16 शैक्षिकवर्षादारभ्य अयं पाठ्यक्रमः वर्षद्वयात्कः अभवत् ।

## 4. शिक्षाशास्त्रिप्रवेशार्थं न्यूनतमयोग्यता -

### I. शैक्षिकयोग्यता

a) शिक्षाशास्त्रिप्रवेशपरीक्षायां प्रवेशार्थम् अभ्यर्थी १०+२+३ शिक्षाप्रणालीमनुसृत्य शास्त्रिपरीक्षायाम् अथवा B.A (L/OL)./ B.A. (Honors)/B.Sc.परीक्षायाम् (वर्षत्रयेऽपि संस्कृतमुख्यविषयक) /विद्वन्मध्यमा /शिरोमणि (संस्कृतम्) अथवा आचार्यः /एम.ए. (संस्कृते)/विद्वदुत्तमा इति परीक्षायां तत्समकक्षपरीक्षायां वा न्यूनातिन्यूनैः पञ्चाशत (५०) प्रतिशताङ्कैः उत्तीर्णः स्यात् ।

b) अनुसूचितजातिजनजातीयानाम्, अन्याप्रगतजातीयानाम्, अन्यथा सक्षमाणां च कृते शास्त्री/बी.ए. (संस्कृतेन), आचार्यः/एम.ए.(संस्कृतेन) इति परीक्षायाम् अङ्कानां पञ्चचत्वारिंशत् प्रतिशतम् (४५) अर्हताऽस्ति।

c) परीक्षाफलघोषणे विलम्बे सति प्रवेशकाले साक्षात् अथवा गोपनीयपरीक्षोत्तीर्णताप्रमाणमवश्यमेव प्रदर्शनीयं स्यात् अन्यथा प्रवेशार्हता नैव भविष्यति।

**II. आयुषः सीमा -**

शिक्षाशास्त्रिपाठ्यक्रमप्रवेशार्थं 0१.१०.२०२१ दिनाङ्कं यावत् अभ्यर्थी न्यूनातिन्यूनः विंशतिवर्षीयः (२०) स्यात्। अस्मिन् विषये न किमपि शैथिल्यम् अनुमन्यते।

**III. चयनविधिः -**

शिक्षाशास्त्रिकक्षायां प्रवेशः शिक्षाशास्त्रिप्रवेशपरीक्षेत्याख्यया (SSET) सङ्गणकाधारितप्रवेशपरीक्षया Computer Based Test (CBT) भविष्यति। सर्वे प्रवेशार्थिनः अधितन्त्रि (online) माध्यमेन आवेदनं कुर्युः। सर्वैरर्हच्छात्रैः प्रवेशपरीक्षायां सम्मिलितैर्भाव्यम्। शिक्षाशास्त्रिप्रवेशपरीक्षाप्रवेशपत्रं जालस्थानतः (वेबसाईट) यथाविधि प्राप्तुं शक्यते। राष्ट्रियसंस्कृतविश्वविद्यालये प्रवेशार्थं योग्यतासूची निर्मिता भवति। सफलच्छात्राणां सूची जालस्थाने (website) उद्घोषयिष्यते। प्रवेशपरीक्षायां

## 5. शिक्षाशास्त्रिपाठ्यक्रमशुल्कः

| राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः | |
|---|---|
| **रू.५०००/- (प्रथमवर्षस्य)** | **रू.५०००/- (द्वितीयवर्षस्य)** |

*अभ्यर्थी परीक्षाशुल्कं पृथग्रूपेण पूरयेत्। पाठ्यक्रमशुल्केन सह परीक्षाशुल्कः नान्तर्भवति।

**अध्ययनशुल्कः -** प्रवेशसमये अभ्यर्थिभिः राष्ट्रियसंस्कृतविश्वविद्यालयस्य नियमानुसारं शुल्कः देयः।

**विविधव्ययः:-** राष्ट्रियसंस्कृतविश्वविद्यालये शिक्षकप्रशिक्षणविषयकसामान्यविविधव्ययः अभ्यर्थिना प्रदेयः।

**छात्रावासभोजनादिशुल्कः:-** प्रविष्टच्छात्रेभ्यः छात्रावासव्यवस्था परिकल्प्यते। छात्रावासप्रवेश - शुल्केन सह भोजनशालाशुल्कः पृथग्भवति।

## 6. शिक्षाशास्त्रि – अध्ययनकेन्द्रं स्थानानि च -

### राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः

| अध्ययनकेन्द्रस्य नाम | स्थानानि | सम्पर्कः |
|---|---|---|
| राष्ट्रियसंस्कृतविश्वविद्यालयः<br>तिरुपतिः (आन्ध्रप्रदेशः) - 517507<br>जनपदम् – चित्तूर (आ.प्र) | **110** | समायोजकः, प्रवेशपरीक्षा –9494480515<br>सङ्कायप्रमुखः, शिक्षासङ्काय- 0877-2288886<br>वैद्युतीयपत्रसङ्केतः - **nsucet@gmail.com** |

## 7. आरक्षितस्थानानि

### अ. अध्ययनधाराक्रमेण आरक्षणस्थानानि -

I. शिक्षाशास्त्रिकक्षायां निर्धारितस्थानानां सप्ततिप्रतिशतं (70%) परम्परागतधारायाः शास्त्री/आचार्यपरीक्षायाः/बि.ए. अथवा बि.एससी. कक्षायां मुख्यविषयत्वेन संस्कृतं १००० अङ्काः अथवा ततोधिकाङ्कानां कृते अथवा तत्समकक्षपरम्परागतपरीक्षायाः छात्राणां कृते, त्रिंशत्प्रतिशतम् (30%) आधुनिकधारायाः बी.ए. (त्रिषु वर्षेषु संस्कृतम्) / एम.ए. (संस्कृतम्) अथवा समकक्षपरीक्षोत्तीर्णछात्राणां कृते आरक्षिताः सन्ति।

II. कश्चिच्छात्रः यदि धाराद्वये (परम्परागत एवम् आधुनिकधारायां) उपाधिं धत्ते तर्हि तस्य गणना धाराद्वयेऽपि भवति।

### आ. भारतसर्वकारस्य नियमानुसारम् आरक्षणव्यवस्था वर्तते, यथा

| Sl.No. | Category | Reservation |
|---|---|---|
| 1 | अनुसूचितजातीयानाम् अभ्यर्थीनां कृते | 15% |
| 2 | अनुसूचितजनजातीयानाम् अभ्यर्थीनां कृते | 7.5% |
| 3 | अन्य-अप्रगतजातीयानाम् अभ्यर्थीनां कृते (OBC) Non-creamy layer as per Central Govt. List. | 27% |
| 4 | दिव्याङ्गानाम् / प्रज्ञाचक्षुषाम् अभ्यर्थीनां कृते (PwD) | 3% |
| 5 | युद्धे / सैनिकसंघर्षे सशस्त्रसेनागत - हताहतानां विधवानाम् /अपत्यानां कृते **(प्रमाणपत्रे हताहतावस्थाविषये स्पष्ट उल्लेखः अपेक्षितः )** | 3% |
| 6 | क्रीडालूनां कृते (राष्ट्रिय-अन्ताराष्ट्रियस्तरे स्पर्धासु प्रतिभागस्य कृते) | 2% |
| 7. | आर्थिकदुर्बलवर्गीयाणां कृते (EWS) | 10% |

सूचना - **विंशतिप्रतिशत (20%) स्थानानि राष्ट्रियसंस्कृतविश्वविद्यालये अधीतानां छात्राणां कृते आरक्षितानि सन्ति।**

## 8. आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः

i. अनुसूचितजातीयानां/जनजातीयानां/अन्याप्रगतजातीयानां/आर्थिकदुर्बलवर्गीयानां कृते - जिल्लाधीशः / उपजिल्लाधीशः (एस.डी.एम.) /तहसीलदारः/MRO/सक्षमाधिकारी।

ii. अन्यथासक्षमाणां / प्रज्ञाचक्षुषां कृते सर्वकारीयचिकित्सालयस्य प्रधानचिकित्साधिकारी।
**(४० प्रतिशतविकलाङ्गता ततोऽधिका वा अर्हताऽधिकृता)।**

iii. सशस्त्रसेनानां कृते भूसेना / नौसेना / वायुसेनामण्डली - **सक्षमाधिकारी/सचिवः**

## 9. शिक्षाशास्त्रि प्रवेशपरीक्षा-प्रमुखदिनाङ्काः

| क्र.सं. | क्रियाकलापाः | दिनाङ्कः |
| --- | --- | --- |
| 1. | अधितन्त्रिमाध्यमेन आवेदनार्थं प्रारम्भदिनाङ्कः | **12.06.2021** (शनिवासरः) आरभ्य |
| 2. | अधितन्त्रिमाध्यमेन आवेदनार्थं शुल्कपूरणार्थञ्च दिनाङ्काः (विलम्बशुल्करहितम्) | **12.06.2021** तः **12.07.2021** पर्यन्तम् |
| 3. | अधितन्त्रिमाध्यमेन विलम्बशुल्कसहितम् आवेदनार्थं दिनाङ्काः | **13.07.2021** तः **22.07.2021** पर्यन्तम् |
| 4. | अभ्यर्थीभिः आवेदनपत्रे संशोधनार्थं दिनाङ्काः | **23.07.2021** तः **26.07.2021** पर्यन्तम् |
| 5. | विश्वविद्यालयस्यजालस्थानात् आवेदनसमये प्राप्तं ID & Password उपयुज्य प्रवेशपत्रस्य अवारोपणार्थम् आरम्भदिनाङ्कः | **05.08.2021**(गुरुवासरः) आरभ्य |
| 6. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः दिनाङ्कः | **11.08.2021** (बुधवासरः) (तात्कालिकम्) |
| 7. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः तात्कालिक – उत्तरकुञ्चिकानां प्रकाशनदिनाङ्कः | **14.08.2021** (शनिवासरः) (तात्कालिकम्) |
| 8. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः प्रश्नोत्तरेषु विद्यमानसन्देहाभ्यर्थनार्थम् अन्तिमदिनाङ्कः | **17.08.2021** (मङ्गलवासरः) (तात्कालिकम्) |
| 9. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः अन्तिम- उत्तरकुञ्चिकानां प्रकाशनदिनाङ्कः | 21**.08.2021** (शनिवासरः) (तात्कालिकम्) |
| 10. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः परिणामाणाम् उद्घोषणदिनाङ्कः | **23.08.2021** (सोमवासरः) (तात्कालिकम्) |
| 11. | शिक्षाशास्त्रिपाठ्यक्रमस्य प्रथमपरामर्श दिनाङ्कः | 30**.08. 2021** (सोमवासरः) (तात्कालिकम्) |

सूचना : **आवेदनार्थं पूरितः शुल्कः केनापि कारणेन न प्रत्यर्प्यते।**

## 10. प्रवेशपरीक्षा - 2021 दिनाङ्कः समयश्च

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः **2021 तमवर्षस्य अगष्टमासस्य 11** दिनाङ्के प्रातः **10.00 तः 11.30** पर्यन्तं देशस्य विविधकेन्द्रेषु शिक्षाशास्त्रिप्रवेशपरीक्षां चालयिष्यति । अर्हच्छात्राः अधितन्त्रिमाध्यमेन (Online) निर्दिष्टदिनाङ्कात् पूर्वम् आवेदनं कुर्युः । आवेदानार्थं विश्वविद्यालयस्य जालस्थानं परिशीलयत - **http://nsktu.ac.in**

## 11.अधितन्त्रिमाध्यमेन आवेदनार्थं निर्देशाः

1. अधितन्त्रि - आवेदनं ध्यानेन पूरणीयम् ।
2. अधितन्त्रि - आवेदने पूरितानां तथ्यानां सत्यापनं परीक्षासमये प्रवेशसमये च भविष्यति ।
3. कस्यचित् तथ्यस्य असत्यत्वे प्रमाणिते सति, यथानियमं न्यायिकदण्डः, परीक्षायाः निष्कासनम् / प्रवेशनिरस्तीकरणं चेत्यादिकं यथायोग्यं प्रकल्पयिष्यते ।
4. अधितन्त्रि-आवेदने छायाचित्रं स्पष्टं नवीनतमं च स्यात् । परीक्षासमये प्रवेशसमये वा यदि छायाचित्रस्य मेलनं न भविष्यति तर्हि परीक्षायाः निष्कासनं / प्रवेशनिरस्तीकरणं यथानियमं न्यायिकदण्डव्यवस्था अपि करिष्यते।
5. राष्ट्रियसंस्कृतविश्वविद्यालये नियमितरूपेण अध्ययनं कृत्वा शास्त्रिपरीक्षा समुत्तीर्णा अथवा तृतीयवर्षे अध्ययनं कृत्वा वार्षिकपरीक्षा लिखिता। आचार्यद्वितीयवर्षेऽन्तिखण्डे अधीयानाः उत्तीर्णाश्च नियमितच्छात्राः अधितन्त्रीय आवेदने पूर्वमधीतसंस्थास्थाने (Yes)इति पूरणीयम्।
6. **अभ्यर्थिना प्रदत्ता चलदूरवाणीसंख्या प्रवेशप्रक्रियासमाप्तिपर्यन्तं स्थापनीया, यतः प्रवेशपरीक्षासम्बन्धिन्यः सर्वाः सूचनाः प्रदत्तायाः चलदूरवाणीसंख्यायाः कृते एव प्रेष्यन्ते ।**
7. केवलमर्हप्रार्थिभिः प्रवेशपरीक्षायां सम्मिलितैर्भाव्यम् । यदि कश्चिद् पूर्वनिर्धारितशैक्षिकयोग्यतायाः अभावे (appearing candidates) अपि प्रवेशपरीक्षायाम् उत्तीर्णश्चेत् शिक्षाशास्त्रिपाठ्यक्रमप्रवेश सन्दर्भे सः अभ्यर्थी पूर्वनिर्धारितयोग्यताप्रमाणपत्रम् अनिवार्यरूपेण प्रदर्शयेत् । अन्यथा तस्य प्रवेशः निरस्तः भविष्यति।
8. प्रवेशार्हतापरिशीलनम् आरक्षणादीनां निश्चयश्च, एतत्सर्वं UGC नियमानुगुणं राष्ट्रियसंस्कृतविश्वविद्यालयस्य अधीनं वर्तते ।
9. राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रिपाठ्यक्रमप्रवेशसमये शिक्षाशास्त्रिप्रवेशपरीक्षायाः (२०२१) मूलप्रवेशपत्रं (Original Admit card) समर्पणीयम् ।
10. प्रवेशविषये राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतेः निर्णय एव अन्तिमः ।
11. न्यायिकविषयेषु अमरावती (आन्ध्रप्रदेशः) उच्चन्यायालयस्य एव क्षेत्राधिकारः भविष्यति ।

## 12. परीक्षाकेन्द्राणि

प्रवेशपरीक्षाकेन्द्रनिर्धारणम् अभ्यर्थिना प्रदत्तसूचनानुसारमेव भविष्यति । अतः अभ्यर्थी सावधानतया परीक्षाकेन्द्रस्य चयनं कुर्यात् । प्रवेशपरीक्षायाः केन्द्रनिर्धारणानन्तरम् अभ्यर्थी तत् केन्द्रं परिवर्तयितुं न शक्नोति । अभ्यर्थिना निर्धारितकेन्द्रे एव प्रवेशपरीक्षा प्रदेया । **एकस्मिन् केन्द्रे न्यूनातिन्यूनं 25 अभ्यर्थिनः भवेयुः । यदि अभ्यर्थीनां संख्या पञ्चविंशतेः (25) अपेक्षया न्यूना स्यात् तर्हि विश्वविद्यालयेन तत्समीपस्थं केन्द्रं प्रवेशपरीक्षार्थं प्रदीयते ।**

| क्र.सं. | परीक्षाकेन्द्रम् | क्र.सं. | परीक्षाकेन्द्रम् |
|---|---|---|---|
| 1. | Tirupati | 11. | Bargarh |
| 2. | Vijayawada | 12. | Balasore |
| 3. | Visakhapatnam | 13. | Kolkata |
| 4. | Hyderabad | 14. | Nagpur |
| 5. | Chennai | 15. | Bhopal |
| 6. | Bengaluru | 16. | Varanasi |
| 7. | Thrissur | 17. | Patna |
| 8. | Bhubaneswar | 18. | Delhi |
| 9. | Cuttack | 19. | Jaipur |
| 10. | Sambalpur | 20. | Guwahati |

## 13. प्रवेशपरीक्षापद्धतिः

सङ्गणकाधारितपरीक्षा **(Computer Based Test - CBT)** : नाम अभ्यर्थी सङ्गणकयन्त्रस्य पुरतः उपविशति । सङ्गणकयन्त्रे प्रश्नाः प्रदर्शिताः भविष्यन्ति ततः Keyboard or mouse साहाय्येन समीचीनम् उत्तरं देयम् । सर्वेऽपि प्रश्नाः संस्कृतमाध्यमेन एव भविष्यन्ति। अभ्यर्थिना सपदि एकमेव प्रश्नं तत्सम्बद्धं विकल्पचतुष्टयं च द्रष्टुं प्रभवति ।

## 14. प्रवेशपरीक्षार्थं निर्दिष्टावधिः

शिक्षाशास्त्रिप्रवेशपरीक्षायाः अवधिः **सार्धैकघण्टा (1½ hrs.) (90.निमेषाः)** एव ।

## 15. प्रवेशपरीक्षासम्बद्धाः अवधेयाः सूचनाः

- शिक्षाशास्त्रिप्रवेशपरीक्षायाः प्रवेशसमये परीक्षाप्रकोष्ठे प्रवेशपत्रं विना प्रवेशः न भविष्यति।
- शिक्षाशास्त्रिप्रवेशपरीक्षायाम् अवैधसाधनानि अवलम्बयन् उत्तराणि प्रदातुम् अन्यतः साहाय्यं प्राप्नुवन् अनुशासनहीनतां वा प्रदर्शयन् परीक्षार्थी केन्द्राध्यक्षेण सद्यः परीक्षातः बहिष्करिष्यते यथाविधि दण्डनं वा करिष्यते।
- छायाचित्रेण सह वैषम्ये सति, सन्देहे जाते, परीक्षातः निलम्बनम् / प्रवेशात् निलम्बनम् / विधिवत् दण्डनं वा करिष्यते। तदर्थं छात्रः स्वयम् उत्तरदायी भविष्यति।
- परीक्षाभवने गणकयन्त्रं, चलदूरवाणी, स्मार्ट घटी चेत्यादिकं सर्वथा वर्जितम्।
- सर्वैरपि अभ्यर्थिभिः Covid -19 सूचनाः अवश्यमेव पालनीयाः।

## 16. शिक्षाशास्त्रिप्रवेशपरीक्षायाः प्रश्नपत्ररूपरेखा

**समयः- 10.00 वादनतः 11.30 वादनपर्यन्तम्** **पूर्णाङ्काः- 100**

**एकाङ्कीयाः बहुविकल्पात्मकाः शतं प्रश्नाः चतुर्षुभागेषु विभक्ताः भविष्यन्ति। तद्यथा -**

| क्र.सं. | विषयाः | निर्दिष्टप्रश्नाः | निर्दिष्टाङ्काः |
|---|---|---|---|
| १. | संस्कृतभाषादक्षता | 25 | 25 |
| २. | संस्कृतवाङ्मयम् | 25 | 25 |
| ३. | शिक्षणाभिरुचिः | 25 | 25 |
| ४. | सामान्यज्ञानं मानसिकयोग्यता च | 25 | 25 |
| | **योगः** | **100** | **100** |

## 17. मूल्याङ्कनविधिःउत्तीर्णतायै प्रतिशताङ्काश्च -

- सङ्गणाकाधारितं मूल्याङ्कनं भविष्यति।
- 50% पञ्चाशतप्रतिशतात्मक प्राप्ताङ्काःछात्राः एव प्रवेशपरीक्षायाम् उत्तीर्णाः इति विश्वविद्यालयेन उद्घोष्यते।

**सूचनाः -**

- शिक्षाशास्त्रिप्रवेशपरीक्षायाम् उत्तीर्णानां सर्वेषां छात्राणां शिक्षाशास्त्रिपाठ्यक्रमे स्थानप्राप्त्यधिकारः नैव भविष्यति। अतः तदर्थम् आक्षेपाः नैव करणीयाः।
- शिक्षाशास्त्रिप्रवेशपरीक्षा केवलम् अर्हताप्राप्त्यर्थमेव भविष्यति, न तु शिक्षाशास्त्रिपाठ्यक्रमे प्रवेशाय।
- शिक्षाशास्त्रिप्रवेशपरीक्षायां सफलच्छात्राणाम् एव वरीयतानुसारम् आरक्षणानुगुणं च विश्वविद्यालयस्य नियमावल्यानुगुणं शिक्षाशास्त्रिपाठ्यक्रमे प्रवेशः भविष्यति।

## 18. फलितांशाः -

1. प्रवेशपरीक्षायाः परिणामस्य वरीयतासूची भविष्यति।
2. राष्ट्रियसंस्कृतविश्वविद्यालयः, स्वप्रवेशनीतिमनुसृत्य प्रवेशं कल्पयिष्यति।

## 19. शिक्षाशास्त्रिप्रवेशपरीक्षा - 2021 पाठ्यक्रमः

### Shiksha Sastri (B.Ed.) Entrance Test (SSET) -2021 Syllabus:

### शिक्षाशास्त्रिप्रवेशपरीक्षा - 2021 पाठ्यक्रमः

**Number of MCQ - 100** **Max. Marks - 100**

| सं | प्रथमखण्डः - 25 अङ्काः |
|---|---|
| **1.** | **संस्कृतभाषादक्षता - विषयक्षेत्रम्**<br>i. सन्धिः, शब्दरूपाणि, धातुरूपाणि।<br>ii. प्रत्ययाः - कृत् प्रत्ययाः, णिजन्ताः, सन्नन्ताः, तद्धिताः - अपत्यर्थकाः, मतुप्/वतुप्,<br>iii. स्त्रीप्रत्ययाः - टाप्, ङीप्, ङीष्।<br>iv. समासः - अव्ययीभावः, तत्पुरुषः, द्वन्द्वः/द्विगुः, कर्मधारयः / नञ्, बहुव्रीहिः।<br>v. वाच्यम् - कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम्।<br>vi. कारकम् - कर्तृ, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम्।<br>vii. उपपदविभक्तयः।<br>viii. वर्तनीगता अशुद्धिः। |

| सं | द्वितीयखण्डः - 25 अङ्काः |
|---|---|
| **2.** | **संस्कृतवाङ्मयम् - विषयक्षेत्रम्**<br>वैदिकवाङ्मयम्, ब्राह्मणानि, आरण्यकानि, उपनिषद्, वेदान्तः, दर्शनानि, पुराणानि, रामायणम्, महाभारतम्, महाकाव्यानि, कविः, नाटकम्, गद्यम्, पद्यम्, चम्पू, आधुनिकरचनाः, रचनाकाराश्च। |

| सं | तृतीयखण्डः - 25 अङ्काः |
|---|---|
| **3.** | **शिक्षणाभिरुचिः - विषयक्षेत्रम्**<br>शिक्षा, उद्धेश्यम्, शिक्षकगुणाः, शिक्षणसिद्धान्ताः, अनुशासनम्, शिक्षणाभिवृत्तिः, कक्षाप्रबन्धनम्, शिक्षकभूमिका, शिक्षणोद्धेश्यानि, प्राचीनशिक्षा, शिक्षामनोविज्ञानम्, शिक्षेतिहासः, शिक्षादर्शनम्, शिक्षासमाजशास्त्रम्, समावेशितशिक्षा च। |

| सं | चतुर्थखण्डः - 25 अङ्काः |
|---|---|
| 4. | **सामान्यज्ञानम् – विषयक्षेत्रम् - 13प्रश्नाः**<br>भारतीयसंस्कृतिः, इतिहासः, सङ्गीतम्, तिथिः, चित्रकला, घटना, क्रीडा, राज्यानि, भारतीयसंविधानम्, संस्कृतसाहित्यम्, भाषाः, संयुक्तराष्ट्रसङ्घः, साक्षरता, विज्ञानम्, राजधानि, ऐतिहासिकस्थानानि, पुरस्काराः (क्रीडा, साहित्यम्, सैन्यम्, विज्ञानम्), विशिष्टदिनाङ्काः, मानवाधिकाराः. विश्वसम्मेलनानि, संस्कृतसंस्धाः, समसामायिकविषयाः,<br>**मानसिकयोग्यता – विषयक्षेत्रम्- 12 प्रश्नाः**<br>वर्णमाला - क्रमनिर्धारणम्, संख्या – क्रमनिर्धारणम्, आरोह/अवरोहक्रमः, समयः, वासराः, दिनानि, होराः, दर्पणे समयः/शब्दः, आकृतयः, कार्यकारणानि, अंशः पूर्णश्च, आधारः आधेयश्च, भिन्नशब्दस्य पृथक् करणम्, श्रेणी, गणीतीयतार्किकता, अनुपातात्मक-संख्या/सम्बन्धः, सार्थकक्रमः (विभिन्नवस्तुनि), मानवीयसम्बन्धाः, सामान्यतर्ककथनादिकम्। |

## 20. आदर्शप्रश्नाः 100 प्रश्नाः 100 अङ्काः

अत्र प्रश्नपत्रस्य प्रारूपमात्रं प्रदत्तम् । प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमात् प्रश्नाः भविष्यन्ति । अतः छात्राः)
(पाठ्यक्रमानुगुणम् अध्ययनं कुर्युः ।

# राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः

## शिक्षाशास्त्रिप्रवेशपरीक्षा -2021

**प्रश्नपत्रम् शिक्षाशास्त्रम् -** **पूर्णाङ्काः -100**

**अस्मिन् प्रश्नपत्रे भाग)चतुष्टयं भविष्यति । प्रत्येकस्मिन् भागे 25 बहुविकल्पीयाः एकाङ्कीयाः प्रश्नाः भविष्यन्ति, आहत्य 100 प्रश्नाः ।(**

| | | |
|---|---|---|
| प्रथमभागः | -संस्कृतभाषादक्षता विषयक्षेत्रम् - | - 25 अङ्काः |
| द्वितीयभागः | -संस्कृतवाङ्मयम् विषयक्षेत्रम् - | 25 -अङ्काः |
| तृतीयभागः | -शिक्षणाभिरुचिः विषयक्षेत्रम् - | 25 -अङ्काः |
| चतुर्थभागः | -सामान्यज्ञानं मानसिकयोग्यता च | 25 -अङ्काः |

**प्रथमखण्डः - संस्कृतभाषादक्षता विषयक्षेत्रम् -**

.1कुर्वन्नास्ते इत्यत्र कः आगमः ?

Aनुक्. Bनुम्.
Cनाक्. Dङमुट्.

.2विद्लृ लाभे इति धातोः किं रूपम् ?

Aविन्दति . Bवेत्ति .
Cवेद . Dविवेद .

.3श्वशपरस्य अपत्यं पुमान् -

Aश्वाशुरः. Bश्वाशुरिः .
Cश्वाशुर्यः . Dश्वशुरेयः .

.4सुमङ्गली इत्यत्र स्त्रीप्रत्ययः क ?

Aङीप् . Bङीष् .
Cङीन् . Dई .

.5जेतुम् इच्छति इत्यर्थे सन्नन्तं रूपं किम् ?

A जिगमिषति .
B जाययति .
C जिगीषति .
D जिजयति .

.6 उत्तमर्णः नाम -

A ऋणदाता .
B ऋणग्रहीता .
C उत्तमम् ऋणम् .
D ऋणे साक्षी .

साधुवाक्यं चिनुत .7 ।

A गृहस्य परितः वृक्षाः .
B गृहं परितः वृक्षाः .
C गृहात् परितः वृक्षाः .
D गृहे परितः वृक्षाः .

.8 युवजानिः कः ?

A युवस्य जानि .
B युवतिः जाया यस्य सः .
C युवकस्य जाया .
D युवकस्य जानिः .

.9 आख्यातोपयोगे इति सूत्रे आख्याता कः ?

A .धातु
B वक्ता .
C तिङन्तम् .
D कथा .

.10 एतेषु असाधुरूपं किम् ?

A आदर्शाणाम् .
B पुष्पाणाम् .
C पत्राणाम् .
D गुरूणाम् .

## द्वितीयखण्डः -संस्कृतवाङ्मयम् विषयक्षेत्रम् -

.11 सामवेदस्य ऋत्विक् कः ?

A होता .
B ब्रह्म .
C अध्वर्युः .
D उद्गाता .

.12 "अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" इतीदं वाक्यं कस्यामुपनिषदि वर्तते ?

A छान्दोग्योपनिषदि .
B मुण्डकोपनिषदि .
C ईशावास्योपनिषदि .
D बृहदारण्यकोपनिषदि .

.13औलूक्यदर्शनं कस्य नामान्तरम् ?

A.न्यायदर्शनस्य
B.वैशेषिकदर्शनस्य
C.पूर्वमीमांसादर्श .नस्य
D.उत्तरमीमांसादर्शनस्य

.14पुराणस्य पञ्चलक्षणे प्रतिपादितं द्वितीयं लक्षणं किम् ?

A.उपसर्गः
B.प्रतिसर्गः
C.वंशविलयः
D.वंशानुचरितम्

.15माघकाव्ये अङ्गीरसः कः ?

A.शृङ्गारः
B.वीरः
C.करुणः
D.भयानकः

.14सौन्दरानन्दमहाकाव्यस्य कर्ता कः ?

A.मातृचेटः
B.भट्टभौमिकः
C.अश्वघोषः
D.आर्यशूरः

.15वीरस्य स्थायिभावो विद्यते –

A.जुगुप्सा
B.रतिः
C.उत्साहः
D.भयानकः

.16रत्नावली इति रचना वर्तते –

A.नाटकम्
B.नाटिका
C.दृश्यकाव्यम्
D.श्रव्यकाव्यम्

.17चण्डालकन्यावर्णनं कस्मिन् काव्ये वर्तते ?

A.कादम्बर्याम्
B.रावणार्जुनीये
C.जातकमालायाम्
D.दशकुमारचरिते

.18शिवराजविजयः इति गद्यकाव्यस्य रचयिता कः ?

A.अम्बिकादत्तव्यासः
B.सम्भाजी
C.तानाजी
D.चारुदेवशास्त्री

.19बोधिसत्त्वचरितं केन रचितम् ?

A .चारुदेवशास्त्रिणा
Bसत्यव्रतशास्त्रिणा .
Cचमूकृष्णशास्त्रिणा .
Dशास्त्रिणा.एन्.पी .

.20मल्लिनाथकृता रघुवंशस्य टीका –

Aसञ्जीवनी .
Bघण्टापथम् .
Cसर्वङ्कषा .
Dजीवातुः .

## तृतीयखण्डः -शिक्षणाभिरुचिः विषयक्षेत्रम् -

.21शिक्षायाः कः सिद्धान्तः प्रभावपूर्णः भवति ?

Aकृत्वाधिगमसिद्धान्तः .
Bकल्पनायाः सिद्धान्तः .
Cअनुकरणसिद्धान्तः .
Dनिदानात्मकसिद्धान्तः .

.22यदि कश्चित् छात्रः अध्यापकस्य वचनं नानुपालयति तर्हि –

Aतस्य उपेक्षा करणीया .
Bसः एकाकी बोधनीयः .
Cपर्य .ाप्तरूपेण दण्डः देयः
Dकक्षायां सः भर्त्सनीयः .

.23शिक्षणं किमाश्रित्य प्रचलति ?

Aवैदुष्यम् .
Bबोधनपुटम् .
Cशिष्यस्य मानसिकस्थितिम् .
Dउपर्युक्तं त्रयमपि .

.24यवनशिक्षायां काबिल आमिल फाजिल इत्यादयः –

Aउपाधयः .
Bविद्यालयः .
Cभयोत्पादकाः .
D. उद्योगः

.25मानवसंसाधनविकासमन्त्रालयस्य )MHRD प्राचीनं नाम किम् (?

Aमानवमन्त्रालयः .
Bमन्त्रालयः-शिक्षा .
Cतन्त्रालयः-मन्त्र .
Dदेवालयः .

.26धैर्यम् एवं तत्परता शिक्षकस्य कीदृशः गुणः?

Aसामाजिकः .
Bनैतिकः .
Cअलौकिकः .
Dभौतिकः .

.27कक्ष्यायाम् अनुशासनहीनतायाः हेतुः –

A बोधनशैली .
B छात्राणाम् आधिक्यम् .
C उभयमपि .
D किमपि .

.28गुरुकुलशिक्षायां कीदृशम् अनुशासनम् आसीत् इत्युच्यते ?

A दमनात्मकम् .
B मुक्त्यात्मकम् .
C आत्मानुशासनम् .
D न किमपि .

.29शिक्षकस्य इयं भूमिका महत्वपूर्णा –

A आदर्शव .्यवहारवान्
B उत्तमम् अध्यापनम् .
C उत्तमः विद्वान् .
D छात्रसेव्यः .

.30Operation Black Board किं निमित्तीकृत्य आरब्धम् ?

A श्यामफलकं निमित्तीकृत्य .
B प्राथमिकशिक्षायाः न्यूनतमसमस्यानाम् अपनोदनाय .
C प्रौढशिक्षायाः सौविध्यवर्धनाय .
D साक्षरतायै .

## चतुर्थखण्डः -सामान्यज्ञानं मानसिकयोग्यता च

.31राष्ट्रियएकतादिवसः कदा पाल्यते- ?

A 31 .अक्तूबर
B 5 .जून्
C 13 .फरवरी
D 26 .नवंबर

.32सिकताचित्रकलायां प्रसिद्धः पद्मश्रीपुरस्कृतः भारतीयः कः ?

A नितीशभारती .
B सुदर्शनपट्नायकः .
C गीतापटेल् .
D मानसकुमारः .

.33 अग्रीमसंख्या का.......3,7,13,27,53 ?

A107 .
B109 .
C111 .
D105 .

.34अधोलिखितेषु किं भिन्नम् ?

A .amezon.com B .Snapdeal.com
C .Flipcart.com D .Linkdin.com

35. भारतसर्वकारेण अर्जुप्रशस्तिः किमर्थं प्रदीयते ?

Aक्रीडार्थम् . B .साहित्यक्षेत्रार्थम्
C .विज्ञानक्षेत्रार्थम् Dकलाक्षेत्रार्थम् .

.36रिक्तस्थानं पूरयत मेघः.....वृष्टिः....

Aदिवसः . Bऊष्णता .
Cसूर्यः . Dअग्निः .

.37जम्मु कदा स्थापिता आसीत् 370 काश्मीरे धारा-?

A 15 .अगष्ट 1947 B 26 .जनवरी 1950
C 26 .जनवरी 1957 D 14 .अगष्ट 1947

.38NRC इत्यस्य पूर्णरूपं किम् ?

A .National register of citizens B .New registration council
C .Nations registered citizen D.National restriction of citizenship

39. एकं चित्रं दृष्ट्वा आनन्देन उक्तं मम पितुः श्वश्रुः ज्येष्ठपुत्रस्य भगिन्याः कनिष्ठः पुत्रः। तर्हि चित्रस्थव्यक्तिना सह आनन्दस्य मातुः कः सम्बन्धः?

Aभ्राता . Bदेवरः .
Cपुत्रः . Dपौत्रः .

.40भारतीयं राष्ट्रियकलाकेन्द्रं कुत्र अवस्थापितम् ?

Aकोलकत्ता . Bनईदिल्ली .
Cमुम्बई . Dमद्रास.

******